ये च मे युद्धकालेषु प्रवहन्ति रथं सदा ।
अशक्यं वारणेन्द्रैश्च दानवैर्बलवत्तरैः ॥
इन्द्रिकालं समुत्सृज्य पक्षच्छेदं यथातदा ।
वाजिनां शक्रवाक्येन शालिहोत्रो महामुनिः ॥
छिन्नपक्षास्तु ते सर्व्वे गत्वा तन्मुनिमब्रुवन् ।
दीनाः सुदुःखसम्पन्ना रुधिरेण परिप्लुताः ॥
भगवन् ! किं निमित्तं नः पक्षच्छेदः कृतस्त्वया ।
अपराधविहीनानां नेहगिच्छन्ति पण्डिताः ॥
तस्माद्गतिर्भव प्राज्ञ ! सर्व्वेषामिह वाजिनाम् ।
यथा स्यात् सर्व्वदा सौख्यं पुष्टिश्च मुनिपुङ्गव ! ॥
अथासौ कृपयाविष्टस्तानुवाच सुदुःखितान् ।
इन्द्रादेशात् कृतं सर्व्वं भवतां पक्षपातनम् ॥
तस्माद्वः प्रकरिष्यामि भविष्यति यथासुखम् ।
पुष्टीरन्या यथा देहे गौरवं च जगत्त्रये ॥
यूयं शक्रादिदेवानां वाहनत्वं करिष्यथ ।
तथा भूमिपतीनाञ्च गौरवेण समन्विताः ॥
यो राजा भवतां पुष्टिं स्वन्नपानादिभिः सदा ।
करिष्यति न सन्देहो भविष्यति स दुर्ज्जयः ॥
न च त्यक्ष्यति तं लक्ष्मीः कदाचिज्जयलक्षणा ।
अपि सर्व्वैर्गुणैर्हीनं बहुशत्रुभिरावृतम् ॥
तथा चैव विधास्यामि परमञ्च चिकित्सितम् ।
पुष्ट्यै च रोगनाशार्थं नराणां विहितं यथा ॥
तस्माद्गच्छत भूलोकं पातालञ्च तथापरे ।
स्वर्गं चान्ये मदादेशाद्येन शान्तिर्भवेद् ध्रुवम् ॥
एवं विसृज्य तान् सर्व्वान् शालिहोत्रस्तुरङ्गमान् ।
चक्रे द्वादशसाहस्रीं तदर्थे संहितां सुधीः ॥
ततःप्रभृति लोकेऽस्मिन् वाह्या जातास्तुरङ्गमाः ।
तत्रश्चिकित्सितं तेषां शालिहोत्रप्रभाषितम् ॥”
इति श्रीनकुलकृतेऽश्वचिकित्सिते प्रश्नो नाम
प्रथमोऽध्यायः ॥

अथ जातिः ।

“उत्तमा मध्यमा नीचाः कनीयांसस्तथापरे ।
चतुर्धा वाजिनो भूमौ जायन्ते देशसंश्रयात् ॥
ताजिकाः खुरशाणाश्च उत्तराश्चोत्तमा हयाः ।
गोचिकाणाश्च केकाणाः प्रौढ़ाहाराश्च मध्यमाः ॥
भाक्कजाश्चोत्तमाशाश्च राजशूलाश्च मध्यमाः ।
गोहराः शावराश्चैव सिन्धुपाराः कनीयसः ॥
अन्यदेशोद्भवा ये च नीचनीचाश्च ते स्मृताः ।
वाजिनो जलजाः केचिद्वह्निजातास्तथापरे ॥
समीरप्रभवाश्चान्ये उलूकंस्तगजास्तथा ।
जलोद्भवा द्विजातीयाः क्षत्त्रिया वह्निसम्भवाः ॥
समीरप्रभवा वैश्या एणोलूकाश्च शूद्रजाः ।
विवेकी सद्गुणो विप्रस्तेजस्वी क्षत्त्रियो बली ॥
दुष्टभावस्तथा वैश्यः शूद्रो निःसत्वकातरः ।
ब्राह्मणः सामवाही च भेदवाही च क्षत्त्रियः ॥
उपादानेन वैश्यः स्याच्छूद्रो दण्डेन ताड़ितः ।
पुष्पगन्धः सदा विप्रः क्षत्त्रियोऽगुरुगन्धकः ॥
घृतगन्धः सदा वैश्यो मीनामोदी च शूद्रकः ।
विप्रार्हा वाजिनः सर्व्वे क्षत्त्रियो भूपतेः सदा ॥
द्वौ वैश्यस्तथाय शूद्रस्य शूद्र एव सुखावहः ।
केचिदिच्छान्ति भूपानां सर्व्वेऽश्वा वाहनोचिताः ॥
तदर्थं भूतले यस्माच्छालिहोत्रेण निर्म्मिताः ।
ब्राह्मणाः क्षेमकृत्येषु सिद्धिं गच्छन्ति वाजिनः ॥
क्षत्त्रिया युद्धकार्य्येषु वैश्या वित्तार्ज्जने सदा ।
शूद्राश्चान्येषु कृत्येषु ज्ञात्वैवं वाजिनः सदा ॥
आरोहेत् सर्व्वकार्य्येषु यदीच्छेच्छाश्वतीं श्रियम् ।
सदा शुभा भवन्त्येवे वाजिनो यस्य भूतले ॥
सदैव निद्रावशगा निद्राच्छेदस्य सम्भवः ।
जायते सङ्करे प्राप्ते कर्करस्य च भक्षणे ॥
प्रबुद्धाः कथयन्त्यश्वाः शुभं वा यदि वाशुभम् ।
स्वस्वामिनो निजैश्चिह्नैस्तद्विज्ञेयं विचक्षणैः ॥
यः सन्नद्धो हयो रावमूर्ध्वमूर्ध्वं करोति च ।
खुराग्रेण लिखन् भूमिं स शंसति रणे जयम् ॥
यः करोत्यसकृन्मूत्रं पुरीषञ्चाशुमोक्षणम् ।
स शंसति पराभूतिं यश्चैवं वर्त्तते हयः ॥
निरामिषं निशीथे यो जागर्त्ति नृपतेर्हयः ।
स शंसति हतन्तस्य स्थिरस्यापि प्रयाणकम् ॥
यदा व्याधिं विना वाजी ग्रासन्त्यजति दुर्म्मनाः ।
अश्रुपातञ्च कुरुते तदा भर्त्तुरशोभनम् ॥
पुलकाङ्कितपुच्छा ये जायन्ते भूपतेर्हयाः ।
निरीक्षन्तः प्रभोर्नाशं ते वदन्ति निशागमे ॥
शरटं रक्षयेद्यत्नात प्रविशन्तं हयालये ।
यदीच्छेच्छाश्वतीं वृद्धिं तेषाञ्चैव तथात्मनः ॥
स्फुलिङ्गा यस्य दृश्यन्ते पुच्छदेशे च वह्निजाः ।
प्रत्यक्षागमाशंसी विज्ञेयो हयपण्डितैः ॥
अश्वशालां समासाद्य यदान्तर्मधुमक्षिकाः ।
मधुजालं प्रकुर्व्वन्ति तदाश्वान् घ्नन्ति कृत्स्नशः ॥
तस्मात् सर्व्वप्रयत्नेन वाजिशालां प्ररक्षयेत् ।
उपायेभ्यश्च सर्व्वेभ्यो य इच्छेद्भूतिमात्मनः ॥
ब्राह्मणान्वाचयेत् स्वस्ति नित्यं वेदविचक्षणान् ।
तिलहोमस्तथा कार्य्यो जपश्च शतरुद्रियः ॥
मन्दुरान्ते सदा धार्य्यो रक्तवक्त्रो महाकपिः ।
सर्व्वपापविनाशाय वाजिनाञ्च विवृद्धये ॥
सरघां रक्षयेद् यत्नात् प्रविशन्तीं हयालये ।
यदीच्छेच्छाश्वतीं वृद्धिं तेषाञ्चैव तथात्मनः ॥
इति श्रीनकुलकृतेऽश्वचिकित्सिते जात्यधिकारे
द्वितीयोऽध्यायः ॥

अथ वर्णवर्णनम् ।

“वर्णाः सप्त भवन्तीह सर्व्वेषां वाजिनां ध्रुवम् ।
तानहं कीर्त्तयिष्यामि भेदैर्जातानानेकधा ॥
सितो रक्तस्तथा पीतः सारङ्गः पिङ्ग एव च ।
नीलः कृष्णोऽथ सर्व्वेषां श्वेतः श्रेष्ठतमः स्मृतः ॥
पट्टार्हो भूपतेर्वाजी सर्व्वश्वेतः प्रशस्यते ।
तदभावे यथा प्रोक्तास्तथा श्रेष्ठाः क्रमेण च ॥
श्वेतः प्रालेयसङ्काशो रक्तः कुङ्कुमसन्निभः ।
हरिद्रासदृशः पीतः सारङ्गः कर्वुरः स्मृतः ॥
पिङ्गः कपिलकाकारो नीलो दूर्व्वायसन्निभः ।
कृष्णो जम्बूफलाकारः शास्त्रज्ञैः समुदाहृतः ॥
पीताभः श्वेतपादो यस्तथा स्यात् सितलोचनः ।
चक्रवाकः स विज्ञेयो राजार्हो वाजिसत्तमः ॥
सर्व्वश्वेतो हयो यस्तु भवेन्मेचककर्णकः ।
स वाजी वाजिमेधार्हः श्यामकर्णः प्रकीर्त्तितः ॥
मुखे चन्द्रकसंवीतो नृपलसमाकृतिः ।
श्वेतपादः स विज्ञेयो मल्लिकाख्यः स पूजितः ॥
चत्वारोऽप्यसिताः पादाः सर्व्वश्वेतस्य वाजिनः ।
भवन्ति यस्य स त्याज्यो यमदूतः सुदूरतः ॥
यस्य पादाः सिताः सर्व्वे पुच्छं वक्षो मुखं तथा ।
मूर्धजाश्च सिता यस्य तं विद्यादष्टमङ्गलम् ॥
भस्माभं वाजिनं जह्यात् सुदूरेण नराधिपः ।
यदि वाञ्छति कल्याणं वाञ्छेच्च श्रीसमुद्भवम् ॥
यस्य रोमविभेदेन जायन्ते रोमविन्दवः ।
पुष्पाख्यः स परित्याज्यः सर्व्ववाजिभयावहः ॥
यस्य पादाः सिताः सर्व्वे तथा वक्त्रञ्च मध्यतः ।
कल्याणपञ्चकः प्रोक्तः सर्व्वकल्याणकृच्च सः ॥
विमिश्रवर्णकाः सर्व्वे प्रशस्ता वाजिनः स्मृताः ।
कृष्णनीलस्य मिश्रत्वमेकं मुक्ता सुदूरतः ॥
यस्योत्कृष्टतरो वर्णो वृद्धिं याति शनैः शनैः ।
नाशयति तथा नीचान् स करोति बहून् हयान् ॥
यस्याधमेन वर्णेन छाद्यते च प्रधानजः ।
विवृद्धिं गच्छता सोऽथ करोति हयसंक्षयम् ॥
इति श्रीनकुलकृतेऽश्वचिकित्सिते वर्णो नाम
तृतीयोऽध्यायः ॥

अथ आवर्त्ताः ।

“आवर्त्ता विंशतिः प्रोक्ताः शालिहोत्रमहात्मना ।
गात्रस्थानविभागेन तेषां व्यक्तिर्मयोच्यते ॥
ललाटे मस्तके चैव ग्रीवायां हृदये तथा ।
पादे पृष्ठे मणीबन्धे नाभिदेशे विशेषतः ॥
स्कन्धे पार्श्वे गले वक्त्रे कुक्षौ रन्ध्रे त्रिके तथा ।
आद्यास्त्रयोदशावर्त्ता विज्ञेया वाजिपण्डितैः ॥
नासिकाग्रे ललाटाग्रे शङ्खे कण्ठे च मस्तके ।
आवर्त्तो जायते येषां ते धन्यास्तुरगोत्तमाः ॥
हृदि स्कन्धे गले चैव कटिदेशे तथैव च ।
नाभौ कुक्षौ च पार्श्वाङ्गे मध्यमास्ते प्रकीर्त्तिताः ॥
ललाटे यस्य चावर्त्तौ द्वितीयस्य स लिङ्गकः ।
मस्तके च तृतीयश्च पूर्णकुक्षिः स उत्तमः ॥
पृष्ठवंशे तथावर्त्तो यस्यैकः संप्रजायते ।
स करोत्यश्वसंघातान् स्वामिनः सूर्य्यसंज्ञकः ॥
कक्षायां जानुमेढ्रे च त्रिवली पुच्छसन्निधौ ।
पुच्छे गुह्ये बलावष्टावावर्त्ता अधमा हये ॥
त्रयो यस्य ललाटस्था आवर्त्ता अधरोत्तराः ।
त्रिकूटः स परिज्ञेयो वाजिवृद्धिकरः परः ॥
एवमेव प्रकारेण त्रयो ग्रीवां समाश्रिताः ।
त्र्यावर्त्तः स वाजीशो जायते भूपमन्दिरे ॥
ललाटे युगलावर्त्तौ चन्द्रार्कौ संप्रकीर्त्तितौ ।
वाजिनो यदि तौ स्यातां राष्ट्रवृद्धिकरौ परौ ॥
उपर्य्युपरि यस्य स्युरावर्त्ता अलिके त्रयः ।
निःश्रेणिः सतु विज्ञेयो राष्ट्रवृद्धिकरः परः ॥
एकोऽथवा कपोलस्थो यस्यावर्त्तः प्रदृश्यते ।
वर्त्तमानः स विज्ञेयः स इच्छेत् स्वामिनाशनम् ॥
कपोलाभ्यान्तथावर्त्तौ विद्येते वाजिनो यदि ।
तावश्विनाविति प्रोक्तौ युद्धकाले जयप्रदौ ॥
गण्डावर्त्तो भवेद्यस्य वाजिनो दक्षिणाश्रयः ।
स करोति महासौख्यं स्वामिनः शिवसंज्ञकः ॥
तद्वद्वामाश्रयः क्रूरः प्रकरोति धनक्षयम् ।
इन्द्राख्यावुभौ शस्तौ नृपराज्यविवृद्धिदौ ॥
कर्णमूले यदावर्त्तस्तन्मध्ये च तथापरः ।